॥ भुवनकोशेपौराणिकज्योतिषिकमतयोर्विरोधस्यसमाधानं ॥ ७ ॥

भ्रगो. १

श्रीगणेशायनमः॥ श्रीसरस्वत्यैनमः॥ पौराणिकज्यौतिषिकमतयोर्भुवनकोशेविरोधसमाधानंवक्तुंप्रतिजानीते॥प्रणम्ये
ति॥ प्रणम्यश्रीकृष्णंमुनिमखिलपौराणिकगुरुंप्रवक्ष्येरोदस्योस्तरमतमाकारममलं॥यथाश्रंगैर्भत्यप्रमुखमुपपये तु
तेसकलंयथावेदव्यासप्रवहतिविरोधश्चनभवेत्॥१॥ रोदस्योः द्युभूम्योःआकारमितिप्रमाणस्यापुपलक्षणंग्रहयुति
ग्रहणोदयास्तनक्षत्रप्रमुखपदार्थः॥ वेदव्यासःपुराणंप्रवहतिगणकशास्त्रं॥१॥ अत्रशंकते॥ क्वेति॥ क्वपंचाशत्
कोष्ठोवनिविपुलनायोजनमितेः क्वरैवज्ञाःप्राहुःक्षितिमयुतगव्यूतिपरिधिं॥ क्वरोदस्योरंतर्धरणिरदभागोभवत
यंक्वतारांकिंजल्कंकुसुटिकमितंनीपकुसुमं॥ २॥ अयुतगव्यूतयःपंचसहस्रयोजनानिपरिधिरस्यास्तांधरणिर
दभागेपंचाशत्कोटियोजनविस्तीर्णायाःपुरोद्वात्रिंशत्तमेंशेसार्धकोटिषट्लक्षा निपंचविंशतिसहस्राणिच॥
तत्रनीपेतिकदंबकुसुमेयथा अंतर्ग्रंथिः परितःसर्वदिक्षुकिंजल्काःसंतिएवंभूगोलपरितस्तारापंजरमित्यर्थः।
२॥ एवमुक्तप्रमाणाकारविरोधेप्रमाणविरोधंतावत्परिहरति॥ नृणामिति॥ नृणांद्वाधिष्ठलंकलयुगभ
वानांकलिषुवांलितिस्तोदिष्ठलंस्फुटमितिभिद्यायोजनमितौ॥ नमानेनब्राह्मदिनमिवकृतस्तावविपुलतांनिः
मितेपंचासःकलिनकरजैर्योजनगणैः॥ ३॥ द्वाधिष्ठलंदीर्घतमत्वं० उच्चप्रमाणा मेतितानिशम्येतिरेवत्वाज
त्युच्चत्वंस्फुटं वैष्णवे०क्षोदिष्ठलंक्षुद्रतमत्वंसदृष्टाक्षुद्रकाकृत्वानितिभागवतेमुचुकुंदः॥ कलिनरानलिषु
द्वानूर्दैर्गतिस्फुटंकलिनणांकरजैः हस्तोत्थैः द्वात्रिंशतासहस्रैर्हस्तानांयोजनंभवतीत्यर्थः॥ ३॥ तुषाराद्रि
र्लंकावधिभरतवर्षंनिगदितंस्फुटतस्तस्यव्यासोनवदशघनीयोजनमितिः॥ दशांतंपंथामोनवदलरीतीयोजन

१

मतः॥ प्रमाणपौराणंसकलमपिविद्यात्रवगुणं॥ ४॥ नवदशघनीनवसहस्री नवदलशतीनवशत्या अर्धसार्धच
तुःशतीतलेंदुयोजनैर्लंकादेवकन्यांतरंस्फुटं॥ तस्याःस्वामिदनागैस्तुविंशत्यासगरक्षतः॥ मैत्रारःपंचदशभिःप
र्यंष्टाभिरीरिता॥ वसुगुल्मंतनोदिग्भिरुज्जयिन्यभ्रपंचभिः॥ कुरुक्षेत्रंखरुद्रैस्तुसुमेरुस्तत्पन्नगैः॥ इत्युक्तं
तत्राष्टादशाधिकाचतुःशतीकुरुक्षेत्रावधिः ततःपरतोद्वात्रिंशद्योजनानिवावस्थमाणरीत्याद्विचत्वारिंशद्यो
जनानिवाहिमशैलोस्तिनेनतच्छतार्धकोटिविस्ताराभूमिरेषामरामुनेरितियदुक्तंतत्रसार्धकोटिद्वयंबोध्यंलक्ष
योजनविस्तारोजंबुद्वीपोयमीरितइत्यत्रपंचसहस्रयोजनतंज्ञेयं॥ तथानवयोजनसहस्रैस्तत्रसार्धचतुःश
तीति॥ अत्रकोसं द्वौद्विगुणोत्तराणांखसमानैःसमुद्रैःपरिवेष्टितानां समानानिवेशइतिपक्षेभूमिनाभिरु
स्य जंबूद्वीपस्यव्यासः॥ ४९३१॥ पंचसहस्रपक्षेतुकोसंप्रोपंचत्रिंशत्सहस्राधिकायांतेषांनिवेशः कोटिमात्रायां
कनकभूमौतावानंशोत्रन्यूनोज्ञेयः। ततःपरितःसपादकोटिसमदतिभूमिसंनिवेशोबोध्यः केचित् ४९५७९
तेषामदूरविप्रकर्षाद्विरोधोबोध्यः॥ ४॥ कुपद्मेति॥ कुपद्मं वेदास्त्रंखखखसरउउ०० वंतंसंधिवलयेवियद्यो
मारातिद्विपशशिभि १८६०० रस्त्रांतपरिधिः वसुव्योमस्त्रांतिथिभि१९७०८ रवनीनेमिरमुतोवहिर्न्य
ष्टांशा १९६३ खरसयुगपुष्टा ४६० भरतभूः ९ भरताःकेतुमालाश्चभद्राश्वाः कुरवस्तथापत्राणिलोकपद्मस्य
मर्यादाशैलवाह्यतइतिवैष्णवादिषुजंबुद्वीपश्चतुरस्रकमलाकारउक्तः। तथाभारतेच॥ चतुरस्रंमहाराज
त्रयस्त्रिंशानुमंडलमितिकमलगर्भदलसंधिवलयस्यव्यासस्त्रयस्त्रिंशच्छतयोजनउक्तः॥ तथा तत्रैव॥ अष्टाश

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

भ्रगो० सहस्राणि षट्शतानि च भारतेषु त्रांत "र्वलयस्य परिधिरभ्युक्तः। तथाऽऽकरीलापंचसहस्रयोजनायामस्य जंबू
द्वीपस्य परिधिः पंचदशसहस्राणि सप्तशतानि अष्टौ च योजनानि भवंति॥ तत्र मध्यमवलयस्य संज्ञे चतुर्दिक्षु चतो
रोहिमाचलादयो मर्यादागिरयः तेभ्यो बहिर्भागे चत्वारि भरतादीनि वर्षाणि। तत्र पद्मपत्रस्यात्यन्तीयभागाका
रस्य धनुराकारोत्तरभुजस्य पूर्वापरायतस्य भरतवर्षस्य दैर्घ्यं एकं सहस्रं नव शतानि सार्धं त्रिषष्टि योजनानि
विस्तारश्च हिमाचलाल्लंकावधिषष्ट्यधिकानि चत्वारिंशत्शतानि [illegible]
योजनानां भवंति॥ अत्र यदेव पत्रसंधेर्वहिर्मध्यमवलयार्धक्रोणेषु क्षेत्रफलमूलमनिलं तदेव मध्यमवल
सिध्यति॥५ याद्बहिः स्थेषु भरतादिषु ज्ञेयं तेन फलतः पंचसहस्रायामैव धरेति॥ यथेति॥ यथाधस्ताद्भूमीपुष्करमुप
रिस्थं पुष्करं तयोरंतरे औन्निर्मितभगणस्तत्र तपनः तुलादौ मेषादौ भ्रमति वलये यत्र विषुवत्संज्ञे तन्ने
मिर्भुजगविशिखाभोगमध्यतिभिः॥ ६॥ ब्रह्मांडस्य द्वे पुष्करे तत्राधस्तनं भूमिरुपरितनं द्यौः तयोर्मध्ये तरिक्षे
भचक्रं तत्र ग्रहाणां गतिमंडलानि षट्॥ तत्र मेषतुलयोरार्द्धदिने यद्दनुपाते नोपरि रविर्भ्रमति तत्स्थानं वि
षुवत्संज्ञं० तेनऽपरितनमपि मेषादौ रविभ्रमणस्थानं विषुवद्दिनलक्षणयागीयते यथोक्तं वैष्णवे यः
श्वेतस्योत्तरशैलः शृंगवानिति विश्रुतः॥ त्रीणि तस्य तु शृंगाणि यैरयं शृंगवान् स्मृतः। उत्तरकुरूणामुपांते
श्वेताचलस्योदीच्यामयमर्थः॥ दक्षिणं चोत्तरं चैव मध्यं चैषुवतं तथा॥ शरदृतं तयोर्मध्ये तद्भानुः प्रति
पद्यते॥ मेषादौ च तुलादौ च मैत्रे च विषुवद्दिनः॥ तदा तुल्यमहोरात्रं करोतीति मिरापहः॥ तन्मेमित्तस्य

विषुवच्चक्रस्य नेमिः परिधिः तत्र भ्रमणमुक्तं मात्स्ये अभ्यंतरं सर्पयति मंडलान्युत्तराणि इत्युपक्रम्य त्रमाणं मंडलस्यापि
योजनाग्रात्रिबोधतयोजनानां सहस्राणि दशाशीतिश्च तत्स्मृतं॥ अधिकं [illegible] पंचशतानि योजनान्यपि वापुनरिति॥६॥
सितमिति॥ सितं ज्योतिश्चक्रं मेरुरवपुराभं भपटलं गाढा मावर्तं धनुरवधिवाग्निहितभं॥ प्रतीच्यस्मिन् प्राचो
नियतगतिविशेषवशगान् ध्रुवः षोडशखेयन् नयति पवनग्रहसितान्॥७॥ मात्स्ये ध्रुवे बद्धं ज्योतिर्मंडलमर्का
दिसप्तर्षीतमुक्तं तन्मध्ये नक्षत्रमंडलं द्वादशराशयात्मकमस्तीति चोक्तं सर्वेषां तु ग्रहाणां वैसूर्यधिस्तात्रसर्पति॥
विस्तीर्णं मंडलं रूपातस्योर्ध्वं चरतेशशी॥ नक्षत्रमंडलं चापि सोमादूर्ध्वं प्रसर्पति॥ नक्षत्रेभ्यो बुधस्तूर्ध्वं बुधादूर्ध्वं तु भा
र्गवः॥ वक्रस्तु भार्गवादूर्ध्वं वक्रादूर्ध्वं बृहस्पतिः॥ तस्मात्तु नैश्चरश्चोर्ध्वं देवाचार्यपरिस्थितः॥ नैश्चरात्तु सप्तर्षीणां
ज्ञेयं सप्तर्षिमंडलं॥ सप्तर्षिभ्यो ध्रुवश्चोर्ध्वमिति॥ नक्षत्रमंडलस्य शिंशुमाराभपर्यायमकराकारत्वमुक्तं भागव
तादौ॥ तत्र ध्रुवेण समसूत्रः शिशुमारस्य नाभिः पुच्छमुपरि मुखं तत्र धस्तात्तस्य वामभागे मुखाग्रादारभ्य
वामावर्तेन वामनासापुटचक्षुःकर्णकुक्षिजघनमेढ्रांतावधिक्रमेण मकरकुंभमीनमेषवृषभमिथुनकर्कराशय
यः संति तथा दक्षिणभागे वामावर्तेनैव जघनकुक्षिकर्णचक्षुर्नासापुटजिह्वांतावधिक्रमेण कर्कसिंहकन्या
तुलावृश्चिकधनुरराशयः षट् राशयः संति एतेष्वेव सप्तविंशतिनक्षत्राणि यथाविभागं भवंति० तत्र एकैक
स्य ग्रहस्य विषुवत्स्थानात्पंतरेण वतिः बहिश्च वतिरिति सार्धाशीतिशतं गतिमंडलानि भवंति तत्र योग्रहो योनक्ष
त्रेण समसूत्रे मंडलेभ्रमति स तस्मिन् नक्षत्रे दृश्यते॥ भ्रमणं चैषां ध्रुवाधीनमित्युक्तं मात्स्यादौ०॥ अभ्यं
तरं सर्पयति मंडलान्युत्तरायणे॥ बाह्यतो दक्षिणं चेति सप्तत्तं सूर्यमंडलं॥ ध्रुवस्य मतसाचैव भ्रमतो ज्योतिषां गणः।

वातानीकमयैःपाशैर्ध्रुवंवैष्णतिसर्पति॥ तेषांभेरश्वयोगश्चतथाकालस्यनिश्चयः॥ अस्तोदयौतथोत्तानअप
नेदक्षिणोचरे॥ विषुवध्रुववर्गश्चसर्वमेतध्रुवेरितं॥ वर्षमेघोहिमंरात्रिः संध्येचैवदिनंतथा॥ शुभाशुभंफलं
चैवध्रुवात्सर्वंप्रतिष्ठितं॥ युगोत्तकोटिसंभोद्वौरश्मीनुस्पंदनस्यतु॥ ध्रुवेणप्रग्रहीतौ तौरश्मीयौनयतो
रविं॥ आरूढ्येतेयदातौतुध्रुवेणसमधिष्ठितौ॥ तदासौमंडलेसूर्यौभ्रमतेमंडलानितु॥ अतीतिमंडलश
तंकाष्ठयोरुभयोश्चरन्॥ ध्रुवेणमुच्यमानेनपुरारश्मियुगेनतु॥ तथैवबाह्यतःसूर्यौभ्रमतेमंडलानितु॥ उद्दृष्ट
यन्वैवेगेनमंडलानितुगच्छतीति॥ प्रतीचिप्रदक्षिणवतेसिचक्रेप्राचःअप्रदक्षिणगतान्॥ गवयस्तुसूर्यस्यां
कशाराअष्टौ ५९८ विधोर्भमांकपर्वताः ७९० अक्षाश्वयः २५ कुजस्यंदुगुणाःषट्बाहवस्तथा ३१३६
बुधस्येष्वधियमलादंता ३२ जीवस्यसायकाः॥ गगनं ५० भार्गवस्याथषडंकाष्टौ ९६।८ शनेर्दंष्ट्रा २ अंबरं
विधुतुंगस्यरसारूपाश्चयस्तथा ६४९ राहोर्वक्त्रयदंशाश्च ३१ गतेलिप्तावलिप्तीकाइति विक्षेपाजापि॥ वि
क्षेपलिप्ताःक्षितिजादिकानांखेशा २२० द्विबाणेंदुमिता १५२ रसाश्वाः ७६ षट्त्रींदवः १३६ साग्निभुगो
१३० विधोस्तुखभोन्मिता २७० स्वाःकथितामुनींद्रैरिति ॥ योयद्ध्रुवमेधः वामतोदक्षिणतःपुरःपश्चादिति
षट्प्रकाराःपवनग्रहाणांतरज्जवःतैःसितान्बध्नाद्॥ ७॥ ननुविषुवन्मंडलंयथुपर्यवावनीमंडलकल्प
मस्तितर्हितद्रूपःसूर्यः सर्वेषांसर्वदागोचरस्यादित्याशंक्याह॥ भचक्रंदूरतोऽतिविरमितमास्यभवदितिध्रु
वोमध्यस्तोपिस्फुरतिभकरग्रहस्यजघने॥ रविंछायाचापंविदधदमुनैवेहपरियन्समुद्यंत्रस्तंयन्निवभरत

वर्षेनिवसितं॥ ८॥ अमुनैवभकराहस्यजघनेनैवपरियन्परिक्रमन्उदयन्सामीप्यतारतम्यात्ऊर्ध्वमा
रोहन्निवभाति॥ अस्तंयन्दूरत्वतारतम्यादधोवतरन्निवभाति॥ केषांभरतवर्षेनिवसतामस्माकमित्यर्थः॥
कथंहजघनेनरवेर्भ्रमणेहेतुःछायाचापंविदधदिति॥ सूर्यस्यध्रुवोभितोयदीयंत्रवद्भ्रमणेछायायाश्चापाकारत्वंमत्सा
त्॥ क्षितिजादेराभ्युपगमस्तु॥ तेविरूद्धलाटुंग्यंतरेणास्मन्मतत्रवेभिधत्ते॥ अतश्चापाकारछायोत्पत्तयथानुपपत्ता
सूर्यस्यभकराहभ्रमणेनैवभ्रमणंसिध्यति॥ ८॥ अत्रैवदिनमानभेदमुपपादयति॥ वरोहारोहाभ्यांत्रिषु
विषुवतोबाह्यवलयेष्वितोजूकानूषट्केव्रजतिविपरीतंसितरगः॥ रवीयानर्कोनोनयनपथमेतिद्युतमथोमगाल्कर्क
ज्येमावनुदिनमहर्दीर्घमपचयौ॥ ९॥ विषुवन्मंडलस्यतुर्यांशादर्वागंगतोरविर्दृग्गोचरोभवतिप्राञ्चां॥ प्रतीचामपितावंतं
देशमतिक्रम्यतिरोधीयतइतितत्रसममेवनक्तंदिवंयतु॥ अस्मत्तोविषुवतुर्यांशसूत्रंतद्विषुवतोबाह्यवलयंप्रतिनीतंस
त्समसूत्रादर्वागतेवकोणं भावोमंडलरेखांस्पृशतिअतस्तावंतंयदाअर्कआयातितदास्माकंदृग्गोचरोभा
वतिएवंतावदेवतिरोधीयतेचेतितदादिनमानंहसतिरात्रयश्चवर्धंतेएवंविषुवतोभ्यंतरेषुमंडलेषुमेषादौ
आरोहावरोहाभ्यांचरन्सूर्यःमध्यरेखात्परतोणुकं सूत्रंयत्रवलयंस्पृशतितत्रैवदृग्गोचरोभवति॥ ०
एवंततः - परतएवचतिरोधीयतइतितदादिनानिवर्धंतेरात्रयश्चह्रसंतिभगणभकरादनुदिनंअ
न्योवद्धिः॥ कर्कादिनुदिनंअन्योपचयः॥ कर्मभमावहर्दीर्घावधिरुक्तोवैष्णवे॥ अशारशामुहूर्तंयदुत्तरायण
पश्चिमं॥ अहर्भवतितच्चापिचरतेमंदविक्रमइति॥ अत्रभचक्रभ्रमणाधीनावेवरवेर्दर्शनाख्यावुदयास्तमयौ

अतोबहिर्वलयेषुमार्गवैपुल्येपि अल्पकालेनसूर्यदर्शनं॥ अंतर्वलयेषुमार्गाल्पत्वेपिबहुकालेनसूर्यदर्शनमित्यत उक्तं मंदविक्रमश्चरतइति॥ ९॥ रथाक्षोमेरोराचरमनगमक्षेतुविषुवत्स्थलेधूर्मध्येकेरिथचरणमंनेक्षरशनां॥ ध्रुवःसंगृह्णातिश्लथयतितत्तोक्षांशनियमा श्चलत्वर्कोषाद्विविषुवदभितोद्वौमितिभिदा॥ १०॥ मेरुमानसोत्तरगिरिंचस्पृशन्सूर्यरथस्याक्षोस्तितत्रविषुवत्प्रदेशेश्वयोजनरुर्मानसोत्तरप्रदेशेचक्रस्थानंमध्यैकंमंडलनीडंयदाक्षवक्षांशानांध्रुवःसंगृह्णातियदाचश्लथाकरोतितदाअक्षेविषु वत्स्थानस्यार्कपरतश्चाक्षांशनियमेनसूर्यस्यर्षाचक्रादिकंआगच्छत्यपसर्पतिच॥ तच्चलनमन्त्रप्रमाणभेदायभवतिनकेवलंकालाद्दिनरात्रिहासौभवतोपितुदेशभेदादपीत्युभयोपादानंश्लोकद्वयेन॥ १०॥ प्रकृतानुपयुक्तमपिनिरक्षदेशोनिसंचुनिशोःसाम्यंउपपादयति॥ नदीगत्येति नदीगत्याभूमिःकमठसदृशीसंतिकगतंपश्यकभूमध्यांशोनरविमयतेग्रांसजनत्ता॥ ततोर्वाकूदूरेपिबधिविरहादृष्टिपथमेत्यतोलंकारुणानांसममिहत्तादारात्रिदिवसं॥ ११॥ कमठसदृशीसत्रयुक्तिः॥ नदीगत्येति॥ अन्यथाविंशमूर्धन्येकत्रोलत्रयोःएकस्यप्राचीप्रतिपरस्याःप्रतीचीप्रतिगमनंनोपपद्यते॥ दक्षिणोत्तरतोनिम्नामध्येतुंगायथाक्षितिरितिमार्कंडेयोक्तिरप्यनुसंधेया॥ ठदीत्याउच्चलमपितत्तोनघागमादेवातेनयथोत्तरदेशस्योच्चत्वात्सूर्यस्यचतेषामस्मदपेक्षयादूरत्वान्मध्यरेखातःपरत्रविषुवतोर्वाकूस्थमपिसूर्यलंकारुणानावेक्षंते॥ यतश्चसमेवक्षुरिष्टदेशोव्यवधायिकानिम्नातुनअतोविषुवतोबाह्यवलयपरस्थदूरगमयिसूर्यंनव्यवधानाभावान्मध्यरेखागतंपश्यंतीतितेषांदिनरात्रिनिलंसमं॥ अथतेपश्यति॥ ततोभूमध्यांशोः

---

११ जनानांनेदीयातिवभवतिनेदीयसिनगेयथारात्येप्यारादिवनगशिरःसंमितरविः। तथेषाचक्रस्थंश्चथमचरमद्वीपजनतारविंपश्येंनान्येत्यवनिरतिरक्षांशरहिता॥ १२॥ यथास्वदेशस्थएवरविःपर्वतस्यदृश्यस्यवाशिरसासंमितश्चेत्तत्सान्निध्यात्सन्निहितइवतद्विप्रकर्षाद्विप्रकृष्टइवचक्षातिएवंजंबूद्वीपस्थानां [illegible] नित्यमीषास्थानसंमितःसूर्यःईषासन्निकर्षतारतम्यात्सामीप्यतारतम्येनप्रतीयतेभवति॥ तथाचरमद्वीपस्थानांचक्रस्थानसंमितोभातीत्युक्तयेषामेवदिनमानप्रदेशोभवति॥ मध्यमद्वीपस्थानांतुनित्यमनाद्यनःस्थस्थानस्थएवभातीति॥ अवनिरवनिर्जंबूद्वीपस्यपरिधिदेशः। दिनमानभेदकैरक्षांशैर्विवर्जितोनतत्रास्माकमिवदिनमानप्रदेशःकदाचिदस्ति १२॥ अथोपरागद्वयंवर्णयति॥ सुषुम्नःसूर्यांशुःप्रथयतिविधुंरेवबनात मस्तद्रैलग्नसतितमिहान्येनवपुषा॥ कुहूष्टिंदुक्रांतरविविषयमाविश्यचविधुंतुरश्चंद्रंगच्छन्ग्रहणयुगमेवंवितनुते॥ १३॥ सुषुम्नःसूर्यरश्मिश्चंद्रमागंधर्वइतिश्रुतौसुषुम्नारश्मिसूर्यरश्मिनापरिपूर्यमाणत्वाच्चंद्रमसिसुषुम्नाशब्दःनतुसएवचंद्रमाः॥ सुषुम्नःसूर्यरश्मिर्यःक्षीणंशशिनमेधतइति॥ मात्स्ये॥ सूर्यरश्मिःसुषुम्नोयस्तर्पितस्तेनचंद्रमाइत्युक्तम्॥ क्षीणंपीतंसुरैःसोमंआप्याययतिशीतांशुमान्॥ मैत्रेयैकलंसंतरश्मिनैकेनभास्कर॥ इतिवैष्णवेदर्शनात्॥ ततश्चतमोराहुःसूर्यमंडलाद्रथस्थःसंलग्नाराशुषुम्नाद्वारातंचंद्रमेलग्नाधिगम्यदृष्टेत्यर्थः। इहपौर्णमासेपर्वणिनतुकालांतरेअन्येनवपुषाकेतुरूपेणचंद्रंग्रसति। अयंभावः एकस्यचक्षुषोयथाअधिष्ठानभूतंगोलकद्वयंएवंस्वर्भानोराहुरूपंत्वधिष्ठानद्वयंतच्चनित्यंराशि

केतुरूपं

मंडलेसमसूत्रेचरति अतोन्यतरेणसुषुम्नद्वारादृष्टमिंदुमितरोग्रसति॰ अतोपर्वणिनचंद्रग्रहणंभवति॰
तथाकुहूषु अमावास्यासुसूर्यस्योपरिष्ठात् आगच्छतांदुनाज्ञाक्रांतोयावान्खेर्विषयः सूर्यमंडलप्रदे
शः तंसूर्यभागमाविध्यतमसाज्ञाछाद्यसूर्यमंडलस्योपरिस्थंचंद्रंस्वर्भानुरासुरः सूर्यंतमसाविध्यत्॥ य
त्तासूर्यस्वर्भानुस्तमसाविध्यदासुरदृष्टादि॰ तदिदमुक्तंमात्स्यवैष्णवयोः आदित्यान्निर्गतोराहुःसोमं
गच्छतिपर्वसु॥ आदित्यमेतिसोमाच्चपुनःसौरेषुपर्वसुइति॥ आदित्यंप्राप्यसुषुम्नद्वारानिर्गतःसन्सो
मंपौर्णमास्यांगच्छति॥ एवंसोमात्सोमंआदित्यस्थंज्ञात्वा आदित्यमेवगच्छतीति श्लोकार्थः॥ ग्रहण
युगमेवंवितनुतइतिस्पष्टार्थं॥ १३॥ सूर्यादुपरिचंद्रोस्तीत्युक्तंअत्रचसूर्येपिरागप्रसंगेप्रदर्शितं॥
अतस्तादृशंयन्चंद्रस्यन्हासवृद्धीअप्युपपादयति शशीशृंगोन्नतोपरितपनादुन्मुखकरैरधस्तः स
न्यस्माज्जलमयमिमंसंप्रथयति। सपूर्णेसोमुखेसकलमपिराकाखिलरथातदस्तात्तादूनंतरतमत
यापक्षयुगलं॥ १४॥ जलमयंचंद्रमंडलंसूर्यरश्मिभिर्यावतिदेशेदृश्यतेतावत्प्रकाशतइत्युभयवा
दिसिद्धांतः। तत्रशुक्लाद्वितीयाचंद्रः सूर्यादुपर्येवास्तीतितस्योपरिशृंगंसेदृश्यते अन्यथार्कादधस्ते
अधःशृंगमेवभासेत॥ एवंकृष्णत्रयोदशीचंद्रोपिपुरोभागेऊर्ध्वशृंगएवदृश्यतेनेनतपनादधःश
शीतिसिद्धं एवंचयदाचंद्रस्यसंपूर्णसूर्याभिमुखत्वंतदापूर्णमास्यांपूर्णश्चंद्रःप्रथते॥ यदातुऔभिमुख्यं
अल्पंतदासूर्यकिरणाक्रांतश्चंद्रभागोनदृश्यतइत्यनमंडलंप्रथते॥ इतिवृद्धिह्रासतारतम्याभ्यामा

भिमुख्यवैमुख्ययोर्बहुलत्वेऽत्रेये॥ १४॥ अत्रज्योतिर्विदांमतमुपन्यस्यतिविवक्षेति॰ विवक्षाभेदाधोध
रणिपटलंकंदुकयतेसदैवसतारापटलमपितत्संजरयते॥ तदाभ्रमोसोभ्रज॰तिपरिधिस्तंविधुवता
पर्विषाश्चस्युःप्रतिखगपथंभिन्नमितिन॥ १५॥ यथावेदांतिनोव्यवहारतःसृष्टिदृष्टौप्रसिद्धायामपिअ
द्वैतत्वप्रतिपत्तिपक्षासत्यत्वात्व्यवहारविरुद्धामपिदृष्टिसृष्टिंअभ्युपगच्छंति॥ एवंभुवनकोशविदो
पिव्यवहारतःपौराणंमतमनुसरंतोपिदृगणितप्रक्रियांउल्लेखं
ते॥ नचैतावतावस्तुतत्त्वमयथाभवति॰ तथाहि॥ भगवच्छास्त्रांतरिक्षेवृष्ट्यस्यभूकंदुकस्पष्टेलंका
धस्तात्तत्समसूत्रेसिद्धपुरं॥ लंकायाःपूर्वतोयमकोटिःपश्चिमतोरोमकपत्तनं॥ दक्षिणतोवडवानलः
उदीच्यांमेरुः गोलस्योत्तरपार्श्वेजंबूद्वीपः दक्षिणेसप्तसमुद्राः षड्द्वीपाश्चेतितेभ्युपगच्छंति॰ एतत्स
र्वंदृष्टविरुद्धंस्ववचनविरुद्धंच॰ नहिगोलतायावास्तवत्वेसर्वदेशीयानांखभूम्योरौर्ध्वाधर्यप्रत्ययोऽ
धितःसंभवति। नापिगोलस्यसमुद्राधारत्वंघटते नापिमेरुतोनदीनांभरतवर्षप्रत्यागमनंचयुज्यते।
एतच्चसर्वज्योतिर्विद्भिरभ्युपगम्यव्यवहारतोदर्पणोदरतुल्यतामवनेरापादयंतोपिदृष्टव्यवहारस्य
लाघवेनसिध्यंतस्याःकंदुकाकारत्वंविवक्षंति॥ तमेतंविवक्षाभेदमाश्रित्ययोधरणिपटलंकंदुकयते
कंदुकमिवाचष्टेसएवदैवज्ञःकंदुकपरिभाषानुरोधात्तारापटलमपितत्संजरयतेतस्यभूगोलस्य

पंजरमिवाचष्टे॰ यथाविकसितपद्मस्य योग्यासः एवमुकुलितस्य परिधिर्भवति॰ अतो दैवज्ञाः भूमेः परिधिं पंच
सहस्रयोजनमेवाहुः तेन व्यासे परिधिलोपचारदर्शनात्॰ यथा च सूर्यस्य परिवेषो भवति एवं विषुवच्चक्रेण भू
गोलस्य कंकणाकारः परिवेषो भवति तेन च विषुवतीप्रतिरवेः पथं भिन्नमिति न तत्र न गगनगमिनवाष्टमितार
वेः रसरसेषुमहीषु मिनादिधोः निगदितावनिमध्यतउच्छ्रितिः॥ श्रुतिरियं किल योजनसंख्येति उक्तसंख्या
द्विगुणेन व्यासेन चंद्रकक्षाभुवं परिवेषयति एवं सूर्यादिकक्षाणामप्युपर्युपरि व्यासवृद्धिः तत्कक्षायां विषु
वच्चक्रमानमपि उत्तरमुत्तरं वर्धते॥ तत्र विषुवतो दक्षिणतो वामतश्च गतिमंडलान्यन्यानि संतीति॰ भच
क्रस्य कुलालचक्रवद्भ्रमणे रथचक्रवद्भ्रमणे च समानमिति नदिनवक्षादौ एव गुपपतिरस्माभिर्वाच्या॥ १५॥
भुवः कंदुकाकारायाः पारमार्थिकत्वेन केवलं दृष्टविरोधः अपि तु सिषाधयिषितग्रहणादिनमानादिदृ
ष्टप्रयोजनहानिरपीत्याह द्वाभ्यां यदीति॥ यदि ब्रूषे सूर्यग्रहमिनपिधानं शशभृतातदातस्मात्संध्यामनु
विधराशेरपितयोः वदन्नूर्णवित्तानि हरवगपथानंतरवतो दृशार्के द्वोर्वेधं कथमनुभवेद्दीदृशि पदे॥ १६॥
यदि सूर्यादधः चंद्रेण सूर्यमंडलस्यापिधानं यत्तदेव सूर्यग्रहणं चेत् तर्हि विभिन्नराशिस्थयोरपितयोश्चं
द्रसूर्ययोः सतोः संध्यामनुसंध्याकालसमीपे अस्मद्दृष्ट्या चंद्रेण सूर्यस्यापिधानं न कर्तुं शक्यं अत्र युक्ति
माह वदन्निति॥ भूगोलं वेष्टयती चंद्रकक्षा तिमहती तामपि वेष्टयती सूर्यकक्षा ततस्त्रयोर्दृशा गुणत्रं

स्थेन

शाधिका तीवमहतीनेऽभेऽपि दारशथा विभक्ते चेन्नखमध्यस्थश्चंद्रः खमध्यस्थमेव सूर्यं पिदध्यात्। तदानीं
सूर्यचंद्रदृशामेकसूत्रपातसंभवात्॥ उपसंध्यं तु तयोरेकसूत्रपातितयोरपि अस्मद्दृशासमं वेधासंभवात्
न युज्यते इति भावः। यतो भवान् ऊर्णावित्तान् ऊर्णाजालस्येव वित्तानि येषां तान् उत्तरोत्तरवृद्धान् अंतरवतः
वक्रंतरयुतान् खेकक्षामार्गान् वदति॰ ततो हेतोरुपसंध्यं चंद्रार्कदृशामेकसूत्रपातो न संभवतीत्यर्थः। ईदृशि
पदे ईदृशिविषये दृशा अर्के द्वोर्वेधं कथमनुभवेत् द्वोलवादीनां कथमपीत्यर्थः। अनुभूयमानस्य तस्य समर्थे
नेन तत्र कापि युक्तिरस्तीति भावः॥ १६॥ एवं परमते सूर्यग्रहणासंभवमुपपाद्य दिनमानभेदासंभवमप्युपाद
यति। अतीव वार्वाचीनेखलु शशभृदस्तोदयपदे ततो धोधोदेशान्नयनकिरणास्तत्समगुणान्॥ समाक्रांतुं श
क्नुवंति विपुलकक्षोदि विचरः खवत्ताधोधः स्तोप्यनुसरतु च सुर्विषयतां॥ १७॥ तुलाहोभ्रमध्यरेखा यास्यम
सूत्रे देशे यत्र चंद्रोदृश्यस्तदनुबिंबो परिप्रदेशस्थानमस्माकं दृष्टिमध्यसूत्राधः स्थमपि विषयं आप्नोति तदा
महाकक्षास्तोरविस्तुलावैरोवमध्यरेखातोधस्तोप्यस्मद्दृष्टिगोचरो भवेत्॥ न तत्र तस्मिन्नवसरे समत्वं रा
त्रिदिवसयोर्न स्यात्॥ न चास्य दोषस्य निवारणे गोलवादिनः कापि युक्तिरस्ति॥ तस्मात्सौराणिकमतमेव
वस्तुतत्त्वविषयं गोलवादस्तु गणितलाघवार्थं दृष्टिसृष्टिवदेव विवक्षामात्रमिति विदांसएव विदां कुर्वंतु॥
॥१७॥ इति संक्षिप्तपौरा॰ ण॰ सौरसिद्धांतमार्गयोः। भूगोलविषये सामंजस्यनिबंधतस्त्रये॥ १८॥ इति

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

प्र०ल०

७

श्रीपद वाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसगोविंदसूरिसूनोः श्रीनीलकंठसूरेस्तौसौर
पौराणिकमतसमर्थनंरोदस्योः प्रकरणंसमाप्तं॥ ५ ॥ ॥ ५ ॥ ५॥